# 2017

## SANSKRIT

**[ Honours ]**

**PAPER – VII**

***Full Marks* : 90**

***Time* : 4 hours**

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

[ NEW SYLLABUS ]

1. निम्नलिखितयोः प्रश्नयोर्मध्ये कस्यचिदेकस्य उत्तरं प्रदेयम्— 10

   (क) 'महती देवता ह्येषा नररूपेण तिष्ठति'— कस्मिन् प्रसङ्गे इयमुक्तिः प्राप्यते ? 'महती देवता' इति पदेन कस्य निर्देशो मनुना कृतः ? तस्य वैशिष्ट्यं सविशदमालोच्यताम् । 2 + 2 + 6

(ख) किं नाम दुर्गम् ? मनुमते दुर्गं कतिविधम् ? दुर्गस्य प्रयोजनं व्याख्यायताम् । $2 + 2 + 6$

2. संस्कृतमाश्रित्य देवनागर्या निम्नलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या विधेया— 6

(क) तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न चलन्ति च ।।

(ख) त्रैविद्येभ्यस्त्रयीं विद्याद्दण्डनीतिञ्च शाश्वतीम् ।
आन्वीक्षिकीञ्चात्मविद्यां वार्तारम्भांश्च लोकतः ।।

3. निम्नलिखितेषु कयोश्चिद्द्वयोष्टीका लेख्या— $2\frac{1}{2} \times 2$

(क) राजधर्मः

(ख) तौर्यत्रिकम्

(ग) ब्राह्मणब्रुवः

(घ) षाड्गुण्यम् ।

4. अधोनिर्दिष्टेषु प्रश्नेषु चतुर्णामुत्तरं संस्कृतमाश्रित्य देवनागरलिप्या विधेयम्— $1 \times 4$

(क) मनुमते त्रयी का ?

(ख) मनुसंहितायाः कुल्लूकविरचितायाः टीकायाः नाम किम् ?

(ग) कः प्रजाः शास्ति ? कश्च प्रजाः अभिरक्षति ?

(घ) 'जाङ्गलदेशः'–अस्य कोऽर्थः ?

(ङ) 'प्रवर्तेताधरोत्तरम्' — अत्र अधरपदेन कस्य निर्देशो मनुना कृतः ?

(च) मनुमतेन राजा कीदृशं देशमावसेत् ?

(छ) राष्ट्रे कति सचिवाः नियोक्तव्याः ?

5. निम्नलिखितयोः प्रश्नयोर्मध्ये कस्यचिदेकस्योत्तरं प्रदेयम् — 10

(क) को नाम 'दायः' ? प्राचीनभारतीयसमाजे दायभाग–व्यवस्था कीदृशी आसीदिति याज्ञवल्क्यदिशा संक्षेपेणालोच्यताम् । 2 + 8

(ख) कीदृशाः कियन्तश्च भवन्ति साक्षिणः ? के के साक्षिणो भवितुं नार्हन्ति ? याज्ञवल्क्यमनुसृत्य साक्षिणां वैशिष्ट्यमालोच्यताम् । 2 + 2 + 6

6. संस्कृतमाश्रित्य देवनागर्या निम्नलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या विधेया — 6

(क) निह्नुते लिखितं नैकमेकदेशे विभावितः ।
दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः ।।

(*ख*) न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता ।
दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा ॥

7. निम्नलिखितेषु कयोश्चिद्द्वयोष्टीका लेख्या— $2\frac{1}{2}\times 2$

(*क*) धर्मशास्त्रम्

(*ख*) प्रमाणम्

(*ग*) स्त्रीधनम्

(*घ*) प्राड्विवाकः ।

8. अधो निर्दिष्टेषु प्रश्नेषु चतुर्णामुत्तरं संस्कृतमाश्रित्य देवनागरलिप्या विधेयम्— $1\times 4$

(*क*) व्यवहारस्य के के पादाः सन्ति ?

(*ख*) कानि कानि प्रमाणानि याज्ञवल्क्येन स्वीकृतानि ?

(*ग*) 'उत्तमर्णः', 'अधमर्णः' इति पदयोः कोऽर्थः ?

(*घ*) कस्मिन् काले आधिनाशो भवति ?

(*ङ*) को नाम 'संसृष्टी' ?

(च) याज्ञवल्क्यमतेन पुत्राः कतिविधाः ?

(छ) व्यवहार क्षेत्रे द्वयोः स्मृत्योर्विरोधे किं करणीयम् ?

9. निम्नलिखितयोः प्रश्नयोर्मध्ये कस्यचिदेकस्योत्तरं प्रदेयम्— 10

(क) कौटिल्यमते विद्यायाः लक्षणं, विभाजनं वैशिष्ट्यं च संस्कृतेनोद्धृतिसहकृतम् आलोच्यताम्। 2 + 4 + 4

(ख) अमात्योत्पत्तिप्रकरणे कौटिल्योल्लिखितानि पक्ष–प्रतिपक्ष–स्वपक्षमतानि संस्कृतेनोद्धृतिपुरःसरम् आलोच्यन्ताम्। 10

10. संस्कृतमाश्रित्य निम्नलिखितयोः श्लोकयोः कस्यचिदेकस्य सप्रसङ्गं व्याख्या विधेया— 6

(क) प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥

(ख) न किञ्चिदवमन्येत सर्वस्य शृणुयान्मतम्।
बालस्याप्यर्थवद्वाक्यमुपयुञ्जीत पण्डितः॥

11. निम्नलिखितेषु कयोश्चिद्द्वयोष्टीका लेख्या— $2\frac{1}{2} \times 2$

(क) मात्स्यन्यायः

(ख) पिशुनः

(ग) अरिषड्वर्गः

(घ) शासनहरः ।

12. अधोनिर्दिष्टेषु प्रश्नेषु चतुर्णामुत्तरं संस्कृतमवलम्ब्य देवनागरलिप्या विधेयम्— 1 × 4

(क) कौटिलीयार्थशास्त्रे आन्वीक्षिकी इति पदस्य कोऽर्थः ?

(ख) राजर्षिः कान् आत्मनः मर्यादारूपेण स्थापयेत् ।

(ग) वार्तेति विद्यायाः किमुपकारकत्वम् ?

(घ) कौटिल्यमते कीदृशदण्डः पूज्यः ?

(ङ) इङ्गितमित्यनेन किं बोध्यते ?

(च) कथं द्व्यक्षः इन्द्रः 'सहस्राक्षः' इति नाम्ना व्यपदिश्यते ?

13. निम्नलिखितेषु प्रश्नेषु कस्यचिदेकस्योत्तरं देयम्— 10

(क) धर्मशास्त्राणामुत्सभूतः ग्रन्थः कः ? कश्चास्ति एषामाविर्भावकालः ? प्रमुखधर्मशास्त्राणां नामान्युल्लिख्य तेषामुद्देश्यं विषयवस्तूनि च संक्षेपेणालोच्यन्ताम् । 1 + 1 + 2 + 6

(ख) वङ्गीयस्मृतिकाराणां धर्मशास्त्रे कीदृशमवदानं विद्यते तदधिकृत्य एको निबन्धो विरच्यताम् । 10

14. अधो लिखितेषु प्रश्नेषु पञ्चानामुत्तरं संस्कृतमाश्रित्य देवनागरलिप्या विधेयम्— 1 × 5

(क) धर्मशास्त्रस्यापरं नाम स्मृतिः किमर्थम् ?

(ख) धर्मशास्त्रविषये पि.भि.काणे—विरचितस्य प्रसिद्धग्रन्थस्य नाम किम् ?

(ग) कतिविधाः महायज्ञाः स्मृतिशास्त्रेषु वर्णिताः ? के च ते ?

(घ) जन्मस्वत्ववादस्य क आसीत् प्रवक्ता ?

(ङ) क आसीत् मेधातिथिः ?

(च) 'स्मृतिचन्द्रिका' इति निबन्धः केन विरचितः ?

———